Title बटुकहृदयम्

Author

Extent ३ पत्र Age

Subject तन्त्र

वटुकहृदय

नं० १२५९

नं० १२५८ २११

(वटुकहृदयप्रारम्भः)

नं. १२५८ क
वटुक हृदयम्
३५ गाथा
संवत् २

व॰ हृ॰ १

ॐश्रीगणेशायनमः कैलासशिखरासीनंदेवदेवंजगद्गु
रुं देवीपप्रच्छसर्वज्ञंशंकरंवरदंशिवं १ देव्युवाच देवदेव
परेशानंभक्ताभीष्टप्रदायकं प्रब्रूहिमेमहाभागगोप्यंय
द्यपिमेप्रभो २ वटुकस्यैवहृदयंसाधकानांहितायच
शिवउवाच शृणुदेविप्रवक्ष्यामिहृदयंवटुकस्यच ३ गु
ह्याद्गुह्यतरंगुप्तंगोपनीयंमहेश्वरि तथापिकथयाम्यद्य
प्रीत्यातववरानने ४ तच्छृणुष्वमयाख्यातोदेवतावटुकः
स्मृतः प्रयोगाभीष्टसिद्ध्यर्थेविनियोगःप्रकीर्तितः ५ प्र
णवेशाःशिरःपातुललाटेप्रमथाधिपः कपोलौकामव

पृष्ठोभ्रूयुगे भैरवेश्वरः ६ नेत्रयोर्वह्निनयनो नासिकाया
मघापहः ऊर्ध्वोष्ठे दीर्घनयनो ऽधरोष्ठे भयाशनः ७ चि
बुके भालनयनो गलयोश्चन्द्रशेखरः मुखान्तरे महाकालो-
भीमाक्षो मुखमंडले ८ ग्रीवायां वीरभद्रो व्याच्चंडिकायां महो
दरः नीलकंठः कंठदेशे जिह्वायां फणिभूषणः ९ दंशा
नान्वज्रनयनो तालुमूले कुलेश्वरः दोर्दंडे वज्रदंडो मेस्कं
धे चहरवल्लभः १० कूर्परे कंजनयनो पाणौ फेत्कारिणीप
तिः अंगुलीषु महाभीमो नखेषु मखहावतु ११ कंठे व्याघ्रा
शनपातु कट्यां मातंग चर्मभृत कुक्षौ कामेश्वरः पातुव

व॰ त्रिदशेशोसुरांतकः १२ मूलपाणिर्लिङ्गदेशे गुह्ये गुह्येश्वरो
२ वतु जंघायां वज्रदमनोजघने ज्रृंभकेश्वरः १३ पादौ धन
प्रदः पातु धनदश्चांगुलीषु च दिग्वासी रोमकूपेषु संधिदे
2 शे सदाशिवः पूर्वाशां कामपीठस्थ⸺ शास्थो ग्निकोणके
याम्यां जालंधरस्थो मे नैर्ऋत्यां कटिपीठकः १५ वारुण्यां
वज्रपीठस्थो वायव्यां कुलपीठगः उदीच्यां गणपीठस्थ
ऐशान्यां मिंडुपीठगः १६ ऊर्ध्वं वजेंद्रपीठस्थः पीठस्थो-
भूतले वतु हृद्ई शानवामांगे चंडो वाग्देवतावतु १७ ग
मने नीवनयनश्रासीने भूतवल्लभः युद्धकाले महाभी

मीभयकालेभयांतकः १८ कुटुंवेशीतिकंठोव्यात्
सर्वदावटुकेश्वरः रक्तरक्तपरेशानभीमदंष्ट्रभयावह १९
महाकालमहाकालरक्तमांकालसंक्रनात् इतीदंहृदयं
दिव्यंसर्वपापप्रणाशनं २० सर्वसंपत्प्रदंभद्रेसर्वसिद्धि
फलप्रदम् सारस्वतप्रदंवालेसर्वसंकटवारणं २१ म
हाप्रसादसिद्ध्यर्थंशृणुयोगंत्वमष्टमे चतुर्दश्याममायां
वापौर्णमास्यांविशेषतः २२ निशायांमंगलदिनेशानिवा
रविशेतः चतुष्पथगतोभूमौनग्नोभूत्वावरानने २३
यदिभाग्यवशाद्देविरात्रौमैथुनसंयुतः मुक्तकेशोम

व॰
हृ॰
३
3

हृशानिभूत्वाचाष्टशतंजपेत् भवेत्परमोशानिसाक्षा-
द्विस्तुर्नसंशयः ममतुल्योभवेद्देविब्रह्मतुल्येनसंशयः २५
सर्वविद्यानिधिर्देविदेवेशोवटुकःपरः २५ भूर्जपत्रेइमं
मंत्रंगंधचंदचर्चितं लिखित्वा^चाष्टगंधेनधारयेत्साध
कोत्तमः २६ करेकंठेवाङ्कमूल्लेधारयेद्वासमाहितः ।
तस्यसर्वार्थसिद्धिःस्यात्सत्यंसत्यंनसंशयः पठनाद्धा
रणाद्देविस्वयंसिद्धीस्वरोभवेत् २७ इतिश्रीविश्वसारो
द्धारेवटुकहृदयंसमाप्तम् ॥


११५९